
# मूलरामायणम्





तमेवंङ्गुणसम्पन्नं रामं सत्यपराक्रमम् ।। 1.1.19 ।।

ज्येष्ठं श्रेष्ठगुणैर्युक्तं प्रियं दशरथः सुतम् ।
प्रकृतीनां हितैर्युक्तं प्रकृतिप्रियकाम्यया ।। 1.1.20 ।।

यौवराज्येन संयोक्तुमैच्छत्प्रीत्या महीपतिः ।

तमेंवङ्गुणसम्पन्नं रामं सत्यपराक्रमम् ।। 1.1.19 ।।

पदच्छेदः – तम् एवं गुण-सम्पन्नं रामं सत्य-पराक्रमम्

ज्येष्ठं श्रेष्ठगुणैर्युक्तं प्रियं दशरथः सुतम् ।
प्रकृतीनां हितैर्युक्तं प्रकृतिप्रियकाम्यया ।। 1.1.20 ।।

पदच्छेदः – ज्येष्ठं श्रेष्ठ-गुणैः युक्तं प्रियं दशराथः सुतम् प्रकृतीनां हितैः युक्तं प्रकृति-प्रिय-काम्यया

यौवराज्येन संयोक्तुमैच्छत्प्रीत्या महीपतिः ।

पदच्छेदः – यौव-राज्येन संयोक्तुम् ऐच्छत् प्रीत्या महीपतिः

तमेवङ्गुणसम्पन्नं रामं सत्यपराक्रमम् ।। 1.1.19 ।।
ज्येष्ठं श्रेष्ठगुणैर्युक्तं प्रियं दशरथः सुतम् ।
प्रकृतीनां हितैर्युक्तं प्रकृतिप्रियकाम्यया ।। 1.1.20 ।।
यौवराज्येन संयोक्तुमैच्छत्प्रीत्या महीपतिः ।

पदपरिचयः –
तम् एवं गुण-संपन्नं = एवंविधं पूर्वोक्त-प्रकारं गुण-सम्पन्नम्
रामं = रामचन्द्रम्
सत्यपराक्रमम् = यथार्थ-वीर्यवन्तम्
ज्येष्ठं = प्रथम-पुत्रम्
श्रेषठ-गुणैः युक्तं = श्लाघ्य-गुणैः सहितम्
प्रियम् = प्रेमपात्रम्
दशरथः = दशरथ-राजः

पदपरिचयः –
सुतम् = पुत्रम्
प्रकृतीनां हितैः युक्तम् = प्रजानां मङ्गलकरैः उपायैः युक्तम्
प्रकृति-प्रिय-काम्यया = प्रजा-हित-कामनया
यौवराज्येन संयोक्तुम् = युवराजं कर्तुम्
ऐच्छत् = इष्टवान्
प्रीत्या = प्रेम्णा
महीपतिः = भूपालः

तमेवंङ्गुणसम्पन्नं रामं सत्यपराक्रमम् ।। 1.1.19 ।।
ज्येष्ठं श्रेष्ठगुणैर्युक्तं प्रियं दशरथः सुतम् ।
प्रकृतीनां हितैर्युक्तं प्रकृतिप्रियकाम्यया ।। 1.1.20 ।।
यौवराज्येन संयोक्तुमैच्छत्प्रीत्या महीपतिः ।

ऐच्छत् –
कः ? = महीपतिः दशरथः
किम् ऐच्छत् ? = यौवराज्येन संयोक्तुम् ऐच्छत्
कं यौवराज्येन संयोक्तुम् ऐच्छत् ? = रामम्
कीदृशं रामम् ? = एवं गुण-सम्पन्नं सत्यपराक्रमं रामम्
पुनः कीदृशं रामम् ? = ज्येष्ठं, श्रेष्ठगुणैः युक्तं, सुतम्
पुनः कीदृशं रामम् ? = प्रकृतीनां हितैः युक्तम्
केन कारणेन रामं यौवराज्येन संयोक्तुम् ऐच्छत् ? = प्रकृति-प्रिय-काम्यया, प्रीत्या (च)

तमेवंङ्गुणसम्पन्नं रामं सत्यपराक्रमम् ।। 1.1.19 ।।
ज्येष्ठं श्रेष्ठगुणैर्युक्तं प्रियं दशरथः सुतम् ।
प्रकृतीनां हितैर्युक्तं प्रकृतिप्रियकाम्यया ।। 1.1.20 ।।
यौवराज्येन संयोक्तुमैच्छत्प्रीत्या महीपतिः ।

सम् + पद् (गतौ) + क्त = सम्पन्न

गुणैः सम्पन्नः तम् - गुण-सम्पन्नम् (तृ.तत्)

सत्यः पराक्रमः यस्य सः , तम् = सत्यपराक्रमम् (ब.व्री)

श्रेष्ठाः गुणाः तैः = श्रेषठगुणैः (कर्मधा.)

अतिशयेन प्रशस्य + इष्ठन् = श्रेष्ठ (श्र-आदेशः भवति)

अतिशयेन वृद्ध + इष्ठन् = ज्येष्ठ (ज्या – आदेशः भवति)

दशसु दिक्षु (अप्रतिहतः) रथः यस्य सः = दशरथः

प्रकृष्टेन क्रियते कार्यम् इति = प्रकृतिः (प्र+कृ+क्तिन्)

प्रियस्य काम्या = प्रियकाम्या (ष.तत्)

प्रकृतीनां प्रियकाम्या तया = प्रकृति-प्रियकाम्यया (ष.तत्)

तमेवंङ्गुणसम्पन्नं रामं सत्यपराक्रमम् ।। 1.1.19 ।।
ज्येष्ठं श्रेष्ठगुणैर्युक्तं प्रियं दशरथः सुतम् ।
प्रकृतीनां हितैर्युक्तं प्रकृतिप्रियकाम्यया ।। 1.1.20 ।।
यौवराज्येन संयोक्तुमैच्छत्प्रीत्या महीपतिः ।

युवा राजा = युवराजः (कर्मधारयः)

युवराजः+ष्यञ् = यौवराज्यं तेन = यौवराज्येन (भावार्थकः तद्धितान्तः)

सं+युज्+तुमुन् = संयोक्तुम्

ऐच्छत् = इष्- लङ्-प्र.ए.

प्रीङ् (प्रीतौ) +क्तिन् = प्रीतिः – प्रीत्या (तया)

मह्याः पतिः = महीपतिः (ष.तत्)

आत्मज,तनय,सूनु,<u>सुत</u>,पुत्र,दायाद – अमरकोषः

तमेवङ्गुणसम्पन्नं रामं सत्यपराक्रमम् ।। 1.1.19 ।।
ज्येष्ठं श्रेष्ठगुणैर्युक्तं प्रियं दशरथः सुतम् ।
प्रकृतीनां हितैर्युक्तं प्रकृतिप्रियकाम्यया ।। 1.1.20 ।।
यौवराज्येन संयोक्तुमैच्छत्प्रीत्या महीपतिः ।

**अन्वयः**

महीपतिः दशरथः एवं गुणसम्पन्नं सत्यपराक्रमं ज्येष्ठं श्रेष्ठ-गुणैः युक्तं प्रकृतीनां हितैः युक्तं प्रियं सुतं तं रामं प्रकृति-प्रियकाम्यया प्रीत्या यौवराज्येन संयोक्तुम् ऐच्छत् ।

तस्याभिषेकसम्भारान् दृष्ट्वा भार्याथ कैकयी ।। 1.1.21 ।।
पूर्वं दत्तवरा देवी वरमेनमयाचत ।
विवासनं च रामस्य भरतस्याभिषेचनम् ।। 1.1.22 ।।

पदच्छेदः – तस्य अभिषेकसम्भारान् दृष्ट्वा भार्या अथ कैकयी पूर्वं दत्त-वरा देवी वरम् एनम् अयाचत विवासनं च रामस्य भरतस्य अभिषेचनम्

पदपरिचयः –
तस्य अभिषेकसम्भारान् दृष्ट्वा = रामस्य राज्याभिषेक-सिद्धताम् अवलोक्य
अथ भार्या कैकयी = दशरथस्य मध्यमा पत्नी केकय-राज-पुत्री
पूर्वं दत्त-वरा देवी = पूर्वस्मिन् काले प्राप्तवरा देवी
वरम् एनम् अयाचत = दशरथं मनोरथं प्रार्थितवती
विवासनं च रामस्य = कौसल्या-पुत्रस्य वनवासम्
भरतस्य अभिषेचनम् = स्वपुत्रस्य यौवराज्येन अभिषेचनम्

तस्याभिषेकसम्भारान् दृष्ट्वा भार्याथ कैकयी ।। 1.1.21 ।।
पूर्वं दत्तवरा देवी वरमेनमयाचत ।
विवासनं च रामस्य भरतस्याभिषेचनम् ।। 1.1.22 ।।

केकयस्य अपत्यं स्त्री = कैकयी

अभिषेकस्य सम्भाराः तान् = अभिषेकसम्भारान्

दत्तौ वरौ यस्यै सा = दत्तवरा

अभि +सिच् (सेचने) = अभिषेक

सम् + भृ(भरणे) +घञ् = भ्रियते इति भारः

भृ (भरणे) +टाप् = भरणीया इति भार्या

वि + वस् + णिच् +ल्युट् = विवासनम्

अभि +सिच्+ल्युट् अभिषेचनम्

# ल्युडन्तेन षष्टी-विभक्ति-प्रयोगः

दशरथः रामं विवासयति ।

दशरथः रामस्य विवासनं करोति ।

दशरथः भरतम् अभिषिञ्चति ।

दशरथः भरतस्य अभिषेचनं करोति ।

कैकयी अभिषेक-कार्याणि पश्यति ।

कैकयी अभिषेक-कार्याणां दर्शनं करोति ।

कैकयी दशरथं वरं याचयति ।

कैकयी दशरथं वरस्य याचनं करोति ।

पूर्वं दशरथः वरं दत्तवान् ।

पूर्वं दशरथः वरस्य दानं कृतवान् ।

तस्याभिषेकसम्भारान् दृष्ट्वा भार्याथ कैकयी ।। 1.1.21 ।।
पूर्वं दत्तवरा देवी वरमेनमयाचत ।
विवासनं च रामस्य भरतस्याभिषेचनम् ।। 1.1.22 ।।

अयाचत –
का अयाचत? = भार्या कैकयी
कीदृशी भार्या कैकयी अयाचत ? = पूर्वं दत्तवरा देवी
कम् अयाचत ? = एनं (दशरथं)
किम् अयाचत ? = वरम् अयाचत
किमिति वरम् अयाचत ? = रामस्य विवासनं भरतस्य अभिषेचनं च
किं कृत्वा वरम् अयाचत ? = तस्य (रामस्य) अभिषेकसम्भारान् दृष्ट्वा वरम् अयाचत

तस्याभिषेकसम्भारान् दृष्ट्वा भार्याथ कैकयी ।। 1.1.21 ।।
पूर्वं दत्तवरा देवी वरमेनमयाचत ।
विवासनं च रामस्य भरतस्याभिषेचनम् ।। 1.1.22 ।।

अन्वयः
अथ पूर्वं दत्तवरा भार्या देवी कैकयी तस्य अभिषेकसम्भारान् दृष्ट्वा रामस्य विवासनं भरतस्य अभिषेचनं च एनं वरम् अयाचत ।

स सत्यवचनाद्राजा धर्मपाशेन संयतः ।
विवासयामास सुतं रामं दशरथः प्रियम् ।। 1.1.23 ।।

पदच्छेदः – सः सत्यवचनात् राजा धर्म-पाशेन संयतः विवासयामास सुतं रामं दशरथः प्रियम्

पदपरिचयः –

सः सत्यवचनात् = सः सत्यव्रतात् (सत्यवचनत्वात्)
राजा = नृपः
धर्म-पाशेन संयतः = धर्मबन्धनेन बद्धः
विवासयामास = वनं प्रेषितवान्
सुतं रामं = पुत्रं रामचन्द्रम्
दशरथः = राजा दशरथः
प्रियम् = प्रियपात्रम्

स सत्यवचनाद्राजा धर्मपाशेन संयतः ।
विवासयामास सुतं रामं दशरथः प्रियम् ।। 1.1.23 ।।

सत्यं वचनं = सत्यवचनं तस्मात् = सत्यवचनात्

धर्मः एव पाशः = धर्मपाशः तेन = धर्मपाशेन (कर्मधा)

सम् + यम् + क्त = संयतः

वि + वस् + णिच् + लिट् (प्र.पु.ए.) = विवासयामास

बद्ध, कीलित, संयत = अमरः

अन्वयः
सत्यवचनात् धर्मपाशेन संयतः सः राजा दशरथः प्रियं सुतं रामं विवासयामास ।

स जगाम वनं वीरः प्रतिज्ञामनुपालयन् ।
पितुर्वचननिर्देशात् कैकेय्याः प्रियकारणात् ।। 1.1.24 ।।

पदच्छेदः – सः जगाम वनं वीरः प्रतिज्ञाम् अनुपालयन् पितुः वचन-निर्देशात् कैकेय्याः प्रिय-कारणात्

पदपरिचयः –
सः जगाम वनं = रामः अरण्यं गतवान्
प्रतिज्ञाम् अनुपालयन् = पितुः प्रतिज्ञां संरक्षन्
पितुः वचन-निर्देशात् = जनकस्य आज्ञया
कैकेय्याः = विमातुः (भरतस्य मातुः)
प्रियकारणात् = प्रीति-कारणतः

स जगाम वनं वीरः प्रतिज्ञामनुपालयन् ।
पितुर्वचननिर्देशात् कैकेय्याः प्रियकारणात् ।। 1.1.24 ।।

वचनस्य निर्देशः तस्मात् = वचननिर्देशात् (ष.तत्)

प्रियस्य कारणं तस्मात् = प्रियकारणात् (ष.तत्)

गम् + लिट् (प्र.पु.ए.) = जगाम

अनु + पाल् +शतृ = अनुपालयन् (प्र.ए)

अन्वयः

वीरः सः पितुः वचन-निर्देशात् कैकेय्याः प्रियकारणात् प्रतिज्ञाम् अनुपालयन् वनं जगाम ।